## || महा विष्णु स्तोत्रम् - गरुडगमन तव ||

गरुडगमन तव चरणकमलमिह मनसि लसतु मम नित्यम्

मनसि लसतु मम नित्यम् ।

मम तापमपाकुरु देव, मम पापमपाकुरु देव ||

जलजनयन विधिनमुचिहरणमुख विबुधविनुत-पदपद्म

मम तापमपाकुरु देव, मम पापमपाकुरु देव ॥ 1॥

भुजगशयन भव मदनजनक मम जननमरण-भयहारिन्

मम तापमपाकुरु देव, मम पापमपाकुरु देव ॥ 2॥

शङ्खचक्रधर दुष्टदैत्यहर सर्वलोक-शरण

मम तापमपाकुरु देव, मम पापमपाकुरु देव ॥ 3॥

अगणित-गुणगण अशरणशरणद विदलित-सुररिपुजाल

मम तापमपाकुरु देव, मम पापमपाकुरु देव ॥ 4॥

भक्तवर्यमिह भूरिकरुणया पाहि भारतीतीर्थम्

मम तापमपाकुरु देव, मम पापमपाकुरु देव ॥ 5॥

इति जगद्गुरु शृङ्गेरी पीठाधिपति भारती तीर्थस्वामिना विरचितं महाविष्णुस्तोत्रं सम्पूर्णम् ||